# Shrutadhamakritam Vishnu Stotram

# श्रुतधामाकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Shrutadhamakritam Vishnu Stotram

File name : shrutadhAmAkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, tAmraparNImAhAtmya, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 61/70-80||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# श्रुतधामाकृतं विष्णुस्तोत्रम्

ॐ नमस्सत्यसङ्कल्पविकल्पोल्लासितात्मने ।
निर्गुणाय गुणाविष्टकर्मणे ब्रह्मणे नमः ॥ ७० ॥

सत्यं ज्ञानमनन्तं यद्धाम नामादिवर्जितम् ।
ओमित्युपहिताकारमहङ्कारमुपास्महे ॥ ७१ ॥

यतो वाचो निवर्तन्ते मनसाप्राप्य माधवम् ।
हृद्यन्तं परं पश्ये भद्रस्यावाप्तये हरिम् ॥ ७२ ॥

हृषीकं जगतां साक्षात् श्रुतयो यत् प्रशंसिरे ।
तमादिपौरुषं तेजः प्रपद्ये व्योमलक्षणम् ॥ ७३ ॥

अलक्ष्यमक्ष्णां गुणिनां ब्रह्मादीनां यदैश्वरम् ।
महः प्रपद्ये निर्मायं यत्परं परमं हरिः ॥ ७४ ॥

यमन्विष्य महस्तत्त्वमागमान्तगिरां ततिः ।
तद्धाम कामयैकान्तकलिकल्मषनाशनम् ॥ ७५ ॥

अणोरणीयमाद्यन्तमध्यविप्लववर्जितम् ।
अहमाराधये चित्ते मायाजालविमुक्तये ॥ ७६ ॥

देवदेवं महादेवं हरिमभ्युदयेश्वरम् ।
पश्यामि परतत्त्वार्थं निर्मुक्ताशेषकल्मषम् ॥ ७७ ॥

भगवन् परितुष्टोऽस्मि मायालास्यप्रदर्शनात् ।
अहो विभूतिविस्तारो लीलावैशिष्यलक्षणः ॥ ७८ ॥

पुनाति लोकान् गङ्गेव दर्शनात्कीर्तनादपि ।
इतः परं न शोचामि येनाहं त्वत्प्रसादतः ॥ ७९ ॥

तथा कुरु दयां मह्यं त्वामहं शरणं गतः ।

इति ताम्रपर्णीमाहात्म्ये ६१-अध्यायान्तर्गतं

श्रुतधामाकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

ताम्रपर्णीमाहात्म्य । अध्याय ६१/७०-८० ॥

tAmraparNImAhAtmya . adhyAya 61/70-80..

Proofread by PSA Easwaran

*Shrutadhamakritam Vishnu Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*